Tvam Soma Pitrbhi: VAAKYAM

त्वꣳ सोम पितृभिः सँविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयꣴ स्याम पतयो रयीणां ॥
अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवीꣳषि प्रयतानि बर्.हिष्यथा रयिꣳ सर्ववीरं दधातन ॥
बर्.हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषद्ध्वं ।
त आ गताऽ*वसा शन्तमेनाथास्मभ्यꣳ
शं ँयो–ररपो दधात ॥

Tvam Soma Pitrbhi: KRAMAM

त्वꣳ सोम । सोम पितृभिः । पितृभिः सम्ँविदानः ।

पितृभिरिति पितृ – भिः । सम्ँविदानोऽनु ।

सम्ँविदान इति सं – विदानः । अनु द्यावापृथिवी । द्यावापृथिवी आ ।
द्यावापृथिवी इति द्यावा – पृथिवी । आ ततन्थ । ततन्थेति ततन्थ ॥
तस्मै ते । त इन्दो । इन्दो हविषा । इन्दो इतीन्दो । हविषा विधेम ।
विधेम वयम् । वयꣳ स्याम । स्याम पतयः । पतयो रयीणाम् ।
रयीणामिति रयीणाम् ॥ अग्निष्वात्ताः पितरः ।

अग्निष्वात्ता इत्यग्नि – स्वात्ताः । पितर आ । एह । इह गच्छत ।
गच्छत सदस्सदः । सदस्सदः सदत । सदस्सद इति सदः–सदः ।
सदत सुप्रणीतयः । सुप्रणीतय इति सु – प्रणीतयः ॥

अत्ता हवीꣳषि । हवीꣳषि प्रयतानि । प्रयतानि बर्.हिषि ।
प्रयतानीति प्र – यतानि । बर्.हिष्यथ । अथा रयिम् । रयिꣳ
सर्ववीरम् । सर्ववीरम् दधातन । सर्ववीरमिति सर्व – वीरम् ।

दधातनेति दधातन ॥ बर्.हिषदः पितरः । बर्.हिषद इति

बर्.हि – सदः । पितर ऊती । ऊत्यर्वाक् । अर्वागिमा । इमा वः ।

वो हव्या । हव्या चकृम । चकृमा जुषद्ध्वम् । जुषद्ध्वमिति

जुषद्ध्वम् ॥ त आ । आ गत । गतावसा । अवसा शन्तमेन ।

शन्तमेनाथ । शन्तमेनेति शम् – तमेन । अथास्मभ्यम् ।

अस्मभ्य᳚ शम् । अस्मभ्यमित्यस्म – भ्यम् ।

शं ँयोः । योररपः । अरपो दधात । दधातेति दधात ॥